RKMVERI/DSP/MAIS/19-24/D2021/SK-101

# SK-101 कठोपनिषद्-शाङ्करभाष्योपेता

कालावधिः- होराद्वयम् पूर्णाङ्काः ५०

---

**A) अधः यथाकामं पञ्चमन्त्रान् पूरयत्। 1x5=5**

1) नैषा तर्केण __________।
2) अविद्यामन्तरे ________।
3) यथा पुरस्तात् ________।
4) हंसः शुचिषत् _________।
5) मनसैवेदमाप्तव्यं ________।
6) अशब्दमस्पर्शं _________।
7) उत्तिष्ठत जाग्रत ________।

**B) वाक्येनैकेन नीचैः प्रदत्तेषु पञ्चानामुत्तरं लिखत। 1x5=5**

1) उपनिषद् इत्यत्र कः प्रत्ययः?
2) सद् धात्वर्थाः कति, के च ते?
3) किमिच्छन्तः ब्रह्मचर्यं चरन्ति ब्रह्मचारिणः?
4) आत्मनः पुरे कति द्वाराणि सन्ति?
5) उपनिषदि गुहा इति शब्दार्थः कः?
6) ऋतम् इत्यस्य भाष्यस्थलक्षणं किम्?
7) शोकातिगः इत्यस्य व्युत्पत्तिः का?

**C) यथारुचि इह पञ्च समाधत्त। 3x5=15**

1) सद्-धात्वर्थानां योगेन उपनिषच्छब्दार्थः कः?
2) प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते इति मन्त्रे स्वाभिप्रायः कः?
3) यमेन प्रलोभमानानां कामानाम् आख्यानं कुरुत।
4) ओङ्कारस्तुतिं वर्णयत्।
5) आत्मनः दुरवगाह्यत्वं निरूपयत।

6) विद्वदविदुषोः अवस्थां वर्णयत।

7) कठोपनिषदनुसारेण ब्रह्मलक्षणं व्याख्यात।

**D) यथामन्त्रं निम्नदर्शितेषु त्रयः समाधेयाः। 5x3=15**

1) ऊर्ध्वमूलम् इति मन्त्रं विलिख्य भाष्यदिशा व्याख्यात।

2) न नरेणावरेण इति मन्त्रं विलिख्य भाष्यदिशा व्याख्यात।

3) आत्मनः शस्त्रादिभिः अच्छेद्यत्वादिकं भाष्यदिशा व्याख्यात।

4) रथरूपकल्पनां विस्तरेण विशदयत।

**E) अधो विलिखितयोः एकं समाधत्त। 10x1=10**

1) समग्रकठोपनिषदः सारांशं विलिख्य स्वजीवने उपयोगित्वं साधयत।

2) अग्निविद्यालाभेऽपि नचिकेतसः तृतीये वरे कुतः प्रवृत्तिः?

***

RKMVERI/DSP/MAIS/19-24/D2021/SK-102

# SK-102 ईशमुण्डकोपनिषदौ शाङ्करभाष्यसहिते

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दशानाम् उत्तरं यथायथं लेख्यम् 1x10=20**

1) ब्रह्मविद्यायाः परमात्मविषयत्वे, सर्वविद्याप्रतिष्ठात्वे च श्रुतिद्वयं किम् ?
2) आत्मा अप्राणः अमनाः इति कथमुच्यते ? एतत्पदद्वयोपादाने किं प्रयोजनम् ?
3) कानि इष्टकर्माणि, कानि च पूर्तकर्माणि इति श्लोकोद्धरणपूर्वकं लिखत।
4) समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् इति मन्त्रस्थयोः श्रोत्रिय-ब्रह्मनिष्ठपदयोः कोऽर्थः ?
5) विद्याविद्ययोः हेतुस्वरूपफलविरोधे च उदाहृता श्रुतिः का ?
6) ब्रह्म कथं सन्निहितं वरिष्ठं चोच्यते ?
7) ब्रह्मविद् कथं सत्यसङ्कल्पः इत्युच्यते ?
8) ब्रह्म अक्षरं वा कथम् अमृतस्य सेतुः इत्युच्यते ?
   भाष्ये उदाहृतं श्रुतिप्रमाणं च किम् ?
9) आत्मक्रीडः आत्मरतिः इति मन्त्रोक्तपदयोः कः अर्थः ?
10) अविद्याप्रतिबन्धमात्रः कः ? कुतः ?
11) परामृताः इति पदस्य कोऽर्थः ? के च परामृताः इति कथ्यन्ते ?
12) के वेदान्तविज्ञानसुनिश्चितार्थाः ?

**B) सप्तप्रश्नेषु पञ्चानां समाधानं कुरुत। 3x5=15**

1) विद्वान् कथं नातिवादी ? कथं न बाह्यक्रीडः आत्मरतिः भवितुं शक्तः ?
2) अक्षरसमाधानप्रसङ्गे वर्णितं धनुषः दृष्टान्तं दार्ष्टान्तिकसमन्वयपूर्वकं वर्णयत।
3) ब्रह्मणः तमसः परस्त्वं वर्णयित्वा तस्य महिमानं वर्णयत।
4) संसारवृक्षं वर्णयत। मुण्डकमन्त्रे च वर्णितं पक्षिद्वयदृष्टान्तं व्याख्यात।
5) निश्चलस्यात्मनः औपाधिकं क्रियावत्त्वं सभाष्यं समर्थयत।
6) ब्रह्मविदः पूजार्हाः इत्यत्र भाष्योक्तं युक्तिद्वयं समन्त्रव्याख्यानं वर्णयत।
7) ब्रह्मविदां कुतो न विघ्नाशङ्का, कथं च स अब्रह्मवित्कुले न जायते इति व्याख्यात।

**C) पञ्चसु त्रयाणां समाधानं कुरुत।** **5x3=15**

1) मुमुक्षोः किं प्रधानसाधनम् ? यः कामत्यागेन कृतात्मा, तस्य किं फलम् ?
2) निवृत्तप्रधानानि सत्यादिसाधनानि कथं सम्यग्ज्ञानसहकारीणि भवन्तीति प्रतिपाद्य तदर्थवादमुखेन स्तुतिं वर्णयत।
3) ब्रह्म हि विदुषाम् अत्यन्तम् अन्तिके, अविदुषां च अत्यन्तं दूरे इति विषयं समन्त्रभाष्यम् ईशमुण्डकोभयोपनिषदनुसारेण व्याख्यात।
4) अक्षरस्य भूतयोनित्वे दृष्टान्तोपादानपूर्वकं भूतोत्पत्तिप्रकारं वर्णयत।
5) मनसा अक्षरसमाधानप्रक्रियां वर्णयत।

**D) दीर्घप्रश्नैकम् उत्तरत।** **10x1=10**

1) ब्रह्मणः सर्वव्यापित्वं व्याख्याय भिद्यते हृदयग्रन्थिः इति मन्त्रे ब्रह्मविदां ब्रह्माहस्मीत्यनुभवपूर्वकं संसारबन्धमोचनप्रक्रियां वेदान्तसारोक्तं जीवन्मुक्तिप्रकरणम् अनुसृत्य सविस्तरं वर्णयत।
2) विदुषः ब्रह्मात्मैक्यविज्ञानात् ब्रह्मधामप्रवेशो भवत्युक्तं श्रुतौ। तद् ब्रह्मधाम किंविशिष्टः विद्वान् गच्छति, कथं गच्छति, गमनकाले च जायमाना उत्क्रमणप्रक्रिया कथं जायते इति तृतीयमुण्डकमन्त्राधारेण समन्त्रभाष्योदाहरणं वर्णयत।
3) संसारापतितः विद्वान् कथं कृतकृत्यः निरञ्जनश्च भवति ? ब्रह्मज्ञानानन्तरं स विद्वान् किंस्वभावो भवति, कथं वाचरते इति विस्तरशः तृतीयमुण्डकाधारेण व्याख्यात।

***

RKMVERI/DSP/MAIS/18-23/D2021/SK-103

**SK-103 छान्दोग्योपनिषत् (६,७,८)**

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

**A) एकेन पदेन वाक्येन वा उत्तरत।** **1x15=15**

1) एकस्मिन् भुक्ते विदुषि सर्वं जगत् तृप्तं भवतीति क्व उक्तम्?
2) पितापुत्राख्यायिका किमर्था?
3) ब्रह्मबन्धुशब्दार्थः कः?
4) असर्वान् वेदानधीत्य श्वेतकेतुः कथं प्रत्यागतः ?
5) उत तमादेशमित्यादिना उक्तं प्रतिज्ञावाक्यं किम् ?
6) उत तमादेशमित्यत्र आदेश शब्दस्य कः अर्थः?
7) एकविज्ञानेन सर्वविज्ञानपक्षे के दृष्टान्ताः?
8) प्रथममिथ्यात्वलक्षणं किम् ?
9) अग्रे किमासीद्? गुरोर्न्यग्भावं किमर्थमवादीत् श्वेतकेतुः?
10) भाष्यकारमते तुच्छः पदार्थः कः ?
11) तदैक्षत इत्यत्र तत्च्छब्देन किं परामृश्यते ?
12) सदिक्षणोत्तरमाद्या सृष्टिः कस्य?
13) पंचीकरणवादिनी श्रुतिरस्ति न वा ?
14) किंत्रिवृत्करणग्राहिका श्रुतिः का?
15) भूतानां त्रीणि बीजानि कानि?
16) जीव इति शब्दार्थः कः?
17) अद्भ्यः कस्य उत्पत्तिः?

**B) निम्नलिखितेषु यथारुचि पञ्च समाधेयाः।** **5x5=25**

1) अन्नमशितं त्रेधा विधीयते इति पंचमखण्डसारं संगृह्णीत।
2) मधुदृष्टान्तं सप्रसंगं वर्णयत।
3) नदीदृष्टान्तं सप्रसंगं व्याख्यात।

4) महत्वृक्षदृष्टान्तेन जीवापेतं म्रियते, न जीवो म्रियते इति साधयत।

5) न्यग्रोधफलदृष्टान्तेन तत्त्वं विवेचयत।

6) लवणदृष्टान्तेन तत्त्वं विमृशत।

7) गन्धारपुरुषदृष्टान्तेन आचार्यवतः मोक्षलाभं दर्शयत।

**C) एकं प्रश्नं समाधत्त** **10x1=10**

1) सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् इति श्रुत्यर्थं यथाभाष्यं वर्णयित्वा एकविज्ञानेन सर्वविज्ञानं सदृष्टान्तं समर्थयत।

2) स्वप्नान्तं मे सोम्य विजानीही इति अष्टमखण्डसारं लिखत।

***

# SK-108 प्रश्नोपनिषत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) एकेन वाक्येन उत्तरत : 1x10=10**

1) ऋषिप्रश्नप्रतिवचनाख्यायिका किमर्थम्
2) सौर्यायणी अत्र ईकारः किमर्थम्
3) का नाम श्रद्धा
4) यदि तद्युष्मत्पृष्टं विज्ञास्यामः – इत्यत्र यदिप्रयोगः किमर्थः
5) स्थावरजङ्गमानां पतिः कः
6) अग्निः किमर्थं व्रात्यः
7) तृतीयप्रश्नं कः पृष्टवान्
8) स्वप्नः नाम किम्
9) पञ्चमप्रश्नः किं विषयकः
10) मायायाः किं कार्यम्
11) चन्द्रलोकः केषां कृते
12) द्विमात्राविशिष्टोङ्कारोपासनेन कः लोकः प्राप्यते

**B) यथेच्छान् पञ्चप्रश्नान् विशदयत : 5x3=15**

1) आदित्यस्य सर्वाधिष्ठानत्वं प्रतिष्ठापयत।
2) प्रजापतिव्रतफलं किम्
3) प्राणस्य सर्वाश्रयत्वं प्रतिष्ठापयत।
4) अक्षरब्रह्मज्ञानेन किं फलं भवति
5) पूर्वोत्तरपक्षोपस्थापनपुरःसरं मनसः स्वातन्त्र्यं निरूपयत।
6) सृष्टौ प्रधानकर्तृकत्वं खण्डयत।
7) उत्पत्तिमायत्तिं स्थानं विभुत्वं चैव पञ्चधा इत्यादिमन्त्रं व्याख्यात।

**C) पञ्चप्रश्नान् समाधत्त :** **3x5=15**

1) प्रजोत्पत्तिप्रकारं वर्णयत।
2) सुषुप्तिं निरूपयत।
3) षोडशकलपुरुषः कुत्र तिष्ठति इति भाष्यानुसारं वर्णयत।
4) षष्ठप्रश्नानुसारं सृष्टिक्रमं वर्णयत।
5) उत्तरदक्षिणमार्गयोः प्राप्तिप्रक्रियां फलं च निर्दिशत।

**D) एकं विशदयत** **10x1=10**

1) ओङ्कारोपासनप्रकारं तत्फलं च वर्णयत।
2) कौसल्यप्रश्नं पिप्पलाददृष्ट्या उत्तरयत।

***

RKMVERI/DSP/MAIS/18-23/D2021/SK-125

**SK-125 भगवद्गीताभाष्यम् (२,३,४ अध्यायाः)**

कालावधिः- होराद्वयम् पूर्णाङ्काः ५०

---

**A) अधः यथाकामं पञ्चश्लोकान् पूरयत्। 1x5=5**

1) वासांसि जीर्णानि ________।
2) आश्चर्यवत् पश्यति ______।
3) प्रजहाति यदा _________।
4) आपूर्यमाणं _________।
5) कर्मणैव हि ________।
6) कर्मण्यकर्म ________।
7) चातुर्वण्यम् ________।

**B) वाक्येनैकेन नीचैः प्रदत्तेषु पञ्चानामुत्तरं लिखत। 1x5=5**

1) भगवान् कान् प्रवृत्तिलक्षणं धर्मं ग्राहयामास?
2) गीताशात्रं कीदृशम्?
3) कस्मिन् विज्ञाते समस्तपुरुषार्थसिद्धिः?
4) मात्रास्पर्शाः इत्यस्य कः अर्थः?
5) हतश्चेत् को लाभः?
6) निशा इति पदस्य भाष्याभिप्रायः कः?
7) वीतरागभयकोधाः इत्यस्य विग्रहं प्रदर्शयत।

**C) यथारुचि इह पञ्च समाधत्त। 3x5=15**

1) प्रवृत्तिनिवृत्तिलक्षणधर्मविषये भाष्याभिप्रायं लिखत?
2) प्रथमाध्यायस्य प्रवृत्तिनिमित्तं किम्?
3) आत्मनः अविक्रियत्वं साधयितुं कति श्लोकाः प्रवृत्ताः के च ते?
4) अभावात्भावोत्पत्तिनिषेधं व्याख्यात।
5) स्वधर्मे कर्मानुष्ठानस्य श्रेयस्करत्वं निरूपयत।

6) संसारे अनर्थमूलं किमिति यथाश्लोकं व्याख्यात।

7) स्थितप्रज्ञस्य लक्षणं व्याख्यात।

**D) यथाश्लोकं निम्नदर्शितेषु त्रयः समाधेयाः। 5x3=15**

1) नासतो विद्यते भावः इति श्लोकं विलिख्य भाष्यदिशा व्याख्यात।

2) न जायते म्रियते इति श्लोकं विलिख्य भाष्यदिशा व्याख्यात।

3) विद्वदविदुषोः जाग्रन्निशावस्थां भाष्यदिशा व्याख्यात।

4) ज्ञानयोगनिष्ठां भाष्यदिशा व्याख्यात।

**E) अधो विलिखितयोः एकं समाधत्त। 10x1=10**

1) ज्ञानकर्मसमुच्चयादेव मोक्षः इति पूर्वपक्षं साधयत।

2) "ज्यायसी चेत्" इति अर्जुनस्य व्याकुलीभावं, "यच्छ्रेय एतयोरेकम्" इति संशयं च वर्ण्यत।

***

RKMVERI/DSP/MAIS/18-23/D2021/SK-132

## SK-132 ब्रह्मसूत्रे प्रथमाध्याये तृतीयचतुर्थपादौ शाङ्करभाष्योपेतौ

कालावधिः - होराद्वयम्　　　　　　　　　　　　　　　　　　　　　पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त।　　　　　　　　　　　　　　　　　　　　1x10=10**

1) "प्रकरणात्" इत्यत्र कस्य प्रकरणं स्मार्यते?
2) अम्बरान्तधृतिः परमेश्वरस्यैव कर्म, कुतः?
3) ब्रह्मसूत्रस्य प्रथमाध्यायस्य तृतीयपादः किं प्रतिपादयितुम् आरभ्यते?
4) मुक्तोपसृप्यं किम्?
5) भूमाधिकरणस्य पूर्वपक्षः कः?
6) जीवेश्वरयोरभेदः उत्क्रमिष्यत इति कस्य मतम्?
7) अभिध्योपदेशाच्च इति सूत्रं कस्मिन्नधिकरणे पठ्यते?
8) भूमाशब्दस्य अर्थः कः?
9) चमसाधिकरणस्य संशयः कः?
10) जीवेश्वरयोरभेदेन सङ्कीर्तने आश्मरथ्यस्य अभिप्रायः कः?
11) 'समाकर्षात्' इति सूत्रं कस्मिन्नधिकरणे पठ्यते?
12) द्युभ्वाद्यायतनं न प्रधानं, कुतः?

**B) सप्तसु पञ्च समाधत्त।　　　　　　　　　　　　　　　　　　　　3x5=15**

1) स्थित्यदनाभ्यां च।
2) अक्षरमम्बरान्तधृतेः।
3) वदतीति चेन्न प्राज्ञो हि प्रकरणात्।
4) चमसवदविशेषात्।
5) अवस्थितेरिति काशकृत्स्नः।
6) समाकर्षात्।
7) आत्मकृतेः परिणामात्।

**C) त्रीन् समाधत्त।** **5x3=15**

1) भूमाधिकरणम्।
2) चमसाधिकरणम्।
3) कारणत्वाधिकरणम्।
4) वाक्यान्वयाधिकरणम्।

**D) द्वयोरेकं समाधत्त।** **10x1=10**

1) द्युभ्वाद्यधिकरणं ससूत्रं संक्षिपत।
2) प्रकृत्यधिकरणस्य तात्पर्यं यथाभाष्यं व्याख्यात।

***

# SK-133 ब्रह्मसूत्रशांकरभाष्यम् (२.१,२,३)

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

**A) एकेन पदेन वाक्येन वा उत्तरत।** **1x15=15**

1) सर्वज्ञः परमेश्वरः जगतः उत्पत्तिकारणमित्यत्र कः दृष्टान्तः ?
2) प्रथमाध्याये प्रधानकारणवादनिराकरणे कः हेतुः प्रदर्शितः?
3) विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति सूत्रस्य कः अर्थः?
4) अणिमादि सिद्धयः किंसापेक्षाः?
5) धर्मलक्षणं किम्?
6) मनोर्महत्त्वां ख्यापयन्ति तैत्तिरीयसंहितायाः श्रुतिः का ?
7) आत्मभेदकल्पना कपिलमते अस्ति उत न?
8) वेदप्रामाण्यं किं सापेक्षम् ?
9) तर्काविष्टम्भं तु.......... इत्यारभ्य उन्मथिष्यति?
10) रात्रिरुन्नतं स्थाप्य समं शरीरमित्यत्र त्रयं किम् ?
11) तां योगमिति मन्यन्ते इति वाक्यं कुत्र?
12) सांख्ययोगशब्दयोः सिद्धान्ते कः अर्थः ?
13) द्वैतिनो हि ते सांख्या योगाश्च, नात्मैकत्वदर्शिनः इति कस्य उक्तिः ?
14) शिष्टापरिग्रहा इति पदस्य विग्रहः कथम्?
15) प्रधानमल्लनिबर्हणन्यायः कः ?
16) भोक्त्रापत्ते........(पूरयत)
17) समुद्रतरंगादिन्यायः किमर्थः ?

**B) निम्नलिखितेषु यथारुचि पञ्च समाधेयाः।** **5x5=25**

1) स्मृत्यधिकरणे पूर्वपक्षमालोचयत।
2) शिष्टापरिग्रहाधिकरणं व्याख्यात।
3) योगप्रत्युक्त्यधिकरणसारं लिखत।

4) इतरव्यपदेशाधिकरणे पूर्वपक्षमालोचयत ।

5) उपसंहारदर्शनाधिकरणार्थं विचारयत।

6) कृत्स्नप्रसक्त्यधिकरणं विमृशत।

7) सर्वोपेताधिकरणार्थं संगृह्णीत।

**C) अधस्ताद् अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) भोक्त्रापत्यधिकरणसारं संगृह्णीत।

2) वैषम्यनैर्घृण्या-धिकरणमारचयत।

***

RKMVERI/DSP/MAIS/17-22/D2021/SK-135

# SK-135 ब्रह्मसूत्रे तृतीयाध्याये द्वितीयतृतीयपादौ शाङ्करभाष्योपेतौ

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त।** **1x10=10**

1) कास्मात्कारणात् जीवः तिरस्कृतज्ञानैश्वर्यो भवति?
2) पूर्वपक्षिमते जीवस्य सुषुप्तिस्थानं किम्?
3) न तावन्मुग्धो जागरितावस्थः, कुतः?
4) सन्ध्यमित्यस्यार्थः कः?
5) मुच्छावस्था न मरणे अन्तर्भवति, कुतः?
6) 'निर्विशेषं परं ब्रह्म' इति कस्मादधिकरणादवगम्यते?
7) य एव सत्संपन्नः स एव प्रतिबुध्यते, कुतः?
8) जैमिनीयमते कर्मफलदाता कः?
9) तदभावाधिकरणस्य विषयः कः?
10) कस्मिन्नधिकरणे "श्रुतत्त्वाच्च" इति सूत्रं पठितम्?
11) अत एव चोपमा सूर्यकादिवत्" इत्यत्र भाष्ये का श्रुतिरुदाहृता?
12) बादरायणाचार्यस्तु ईश्वरमेव फलहेतुं मन्यते कुतः?

**B) सप्तसु पञ्च समाधत्त।** **3x5=15**

1) सन्ध्ये सृष्टिराह हि।
2) देहयोगाद्वा सोऽपि।
3) अतः प्रबोधोऽस्मात्।
4) स एव तु कर्मानुस्मृतिशब्दविधिभ्यः।
5) फलमत उपपत्तेः।
6) अपि चैवमेके।
7) अरूपवदेव हि तत्प्रधानत्वात्।

**C) त्रीन् समाधत्त।** **5x3=15**

1) मुग्धाधिकरणम्।

2) कर्मानुस्मृत्यधिकरणम्।

3) फलाधिकरणम्।

4) तदभावाधिकरणम्।

**D) द्वयोरेकं समाधत्त।** **10x1=10**

1) सन्ध्यधिकरणस्य तात्पर्यं भाष्यदिशा निरूपयत।

2) उभयलिङ्गाधिकरणमाश्रित्य ब्रह्मस्वरूपनिर्णयं कुरुत।

***

RKMVERI/DSP/MAIS/19-24/D2021/SK-151

# SK-151 पञ्चदशी

कालावधिः- होराद्वयम् पूर्णाङ्कः-50

---

## A) एकेन वाक्येन उत्तरत। 1x10=10

1) 'प्रज्ञानं ब्रह्मे'ति महावाक्यं कस्यामुपनिषदि आम्नायते?
2) पञ्चदशीग्रन्थकारस्य पूर्वाश्रमनाम किम् आसीत्?
3) पञ्चदशीकारमते मायाविद्ययोः लक्षणं किम्?
4) बुद्धीन्द्रियाणि कानि?
5) जाग्रदवस्थायाः प्रसिद्धं लक्षणं किम्?
6) श्लोकं पूरयत- 'मनो दशेन्द्रियाध्यक्षं ....'।
7) प्रज्ञानशब्दस्य कोऽर्थः?
8) श्लोकं पूरयत- 'बुद्धाद्वैतस्वतत्त्वस्य ....'।
9) शंकरानन्दपदस्य अर्थः कः?
10) प्रकृतिः नाम का?
11) पञ्चदश्युक्तं समाधेर्लक्षणं किम्?
12) भूतगुणाः कति के च ते?

## B) पञ्च समासेन व्याख्यात। 3x5=15

1) पञ्चदशीदिशा गुहाशब्दार्थं लिखत।
2) "येनेदं जानते सर्वम्"- इत्यादिश्लोकं प्रपूर्य व्याख्यात।
3) सद्वस्तुनि प्राप्तं सजातीयादिभेदत्रयं निवारयत।
4) इन्द्रियाणाम् आन्तरविषयग्राहकत्वं दर्शयत।
5) धर्ममेघसमाधेर्लक्षणं व्याख्यात।
6) द्विधा विधाय चैकैकम्- इति श्लोकानुसारं पञ्चीकरणं व्याख्यात।
7) "ईश्वरेणापि जीवेन सृष्टं द्वैतम्"- इत्यादिश्लोकं प्रपूर्य व्याख्यात।

**C) त्रीणि विशदयत।** **5x3=15**

1) अपञ्चीकृतपञ्चमहाभूतानां गुण-धर्म-कार्याणि निरूपयत।

2) संविदेव आत्मा इति प्रतिपाद्य तस्य परमानन्दत्वं लिखत।

3) सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् इति छान्दोग्यश्रुतेरर्थं निरूप्य शून्यवादपक्षं खण्डयत।

4) मायाशक्तेर्वर्णनं कुरुत।

5) पञ्चदशीग्रन्थस्य मङ्गलश्लोकं व्याख्यात।

**D) एकं प्रपञ्चयत।** **10×1=10**

1) चतुर्णां महावाक्यानाम् अर्थं पञ्चदशीदिशा प्रतिपादयत।

2) पञ्चकोशानां स्वरूपम् उक्त्वा तेषाम् अनात्मत्वं प्रतिपादयत।

***

RKMVERI/DSP/MAIS/18-23/D2021/SK-164

## SK-164 वेदान्तपरिभाषा अर्थापत्तितः आन्तम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त।** **1x10=10**

1) भूतभौतिकानां केन क्रमेण लयः?
2) सगुणोपासनमपि कथं ब्रह्मसाक्षात्कारे हेतुः?
3) चतुर्विधस्थूलशरीराणि कानि?
4) द्विविधा अर्थापत्तिः का?
5) व्यानाख्यः प्राणविशेषः कीदृशो भवति?
6) "उपासनादिसंसिद्धितोषितेश्वरचोदितम्" इति केन प्रोक्तम्?
7) अन्तःकरणस्य शक्तिद्वयं किम्?
8) सृष्टिवाक्यानां कुत्र तात्पर्यमस्ति?
9) अर्थापत्तौ करणं किम्?
10) निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणमिति कस्य मतम्?
11) त्रिवृत्करणे श्रुतिप्रमाणं किम्?
12) ज्ञानस्य सकलकर्मक्षयहेतुत्वे श्रुतिवाक्यं किम्?

**B) षट् समाधत्त।** **5x6=30**

1) द्विविधा अर्थापत्तिः।
2) मोक्षस्वरूपम्।
3) श्रवणमनननिदिध्यासनानि ज्ञानसाधनानि।
4) ब्रह्मसाक्षात्कारहेतुविषये भामतीकारविवरणकारयोः मतभेदः।
5) अद्वितीयब्रह्मप्रतिपत्तौ सृष्टेरुपयोगः।
6) ब्रह्मणः स्वरूपलक्षणं तटस्थलक्षणं च।
7) जगतः सृष्टिविचारः।

**C) द्वयोरेकं समाधत्त।** **10x1=10**

1) अर्थापत्तेः लक्षणं, प्रकारं च यथाग्रन्थं निरूपयत।

2) प्रयोजनपरिच्छेदानुसारं चतुर्विधप्रलयं सलक्षणं व्याख्यात।

***

RKMVERI/DSP/MAIS/17-22/D2021/SK-167

## SK-167 सिद्धान्तलेशसंग्रहे प्रथमपरिच्छेदः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त।** **1x10=10**

1) विधिविचारः किमुपनिषद्वाक्यमवलम्ब्य प्रवृत्तः?
2) अनन्यव्यापारत्वस्य मुक्त्युपायत्वे श्रुतिप्रमाणं किम्?
3) आज्यभागौ यजति इत्यत्र कः विधिः?
4) को नाम नियमविधिः?
5) कया श्रुत्या भिन्नात्मज्ञानात् मुक्तिरिति भ्रमः स्यात्?
6) वाचस्पतिमिश्रमते जगदुपादानकारणं किम्?
7) सङ्क्षेपशारीरककारमते माया कीदृशं कारणम्?
8) चैतन्यस्य चातुर्विध्यं कस्मिन्ग्रन्थे प्रोक्तम्?
9) मेघाकाशतुल्यो धीवासनाप्रतिबिम्बः कः?
10) "विभेदजनके अज्ञाने नाशमात्यन्तिकं गते" कुत्र प्रोक्तमिदम्?
11) शुद्धं ब्रह्म उपादानमिति कस्य मते?
12) प्रकटार्थकारः को भवति?

**B) अष्टसु षडेव व्याख्येयाः।** **5x6=30**

1) ब्रह्मोपादानत्वविचारं सप्रमाणं कुरुत।
2) विधित्रयस्य लक्षणं सोदाहरणं लिखत।
3) मङ्गलश्लोकस्य तात्पर्यमुल्लिखत।
4) श्रवणवाक्ये नियमविधिं साधयत।
5) अवच्छेदप्रतिबिम्बरहितं ब्रह्म जीव इति मतं निरूपयत।
6) ग्रन्थदिशा मायोपादानत्वविचारं कुरुत।
7) श्रवणविधौ प्रकटार्थकारमतं व्याख्यात।
8) चैतन्यस्य चातुर्विध्यप्रक्रियया जीवेश्वरयोः स्वरूपं यथाग्रन्थं प्रपञ्चयत।

**C) द्वयोरेकं समाधत्त।** **10x1=10**

1) श्रवणविधिवाक्ये विधिविचारं यथाग्रन्थं साधयत।

2) ग्रन्थदिशा बिम्बप्रतिबिम्बपक्षं सोदाहरणं निरूपयत।

***

RKMVERI/DSP/MAIS/17-22/D2021/SK-169

# SK-169 सिद्धान्तबिन्दुः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) एकेन पदेन वाक्येन वा उत्तरत।** **1x15=15**

1) मधुसूदन-सरस्वती-स्वामिनः शंकराचार्याणां नवावतारः कः इति कथयन्ति ?
2) श्रीशंकरः दशश्लोकीं किमर्थं प्रणिनाय ?
3) न वर्णाश्रमाचारधर्माः इत्यत्र कः समासः ?
4) न मे धारणाध्यानयोगा- दयोऽपि इत्यत्र आदिपदेन किं ग्राह्यम् ?
5) वेदपदस्य कोऽर्थः सिद्धान्तबिन्दुकारेण वर्णितः ?
6) तीर्थं नाम किम् ?
7) सांख्यमतस्य असाधुत्वे एकां युक्तिं प्रदर्शयत ?
8) मीमांसकमतं कुतः असाधु ?
9) नष्टाश्वदग्धरथन्यायः कः ?
10) ब्रह्मणः वियद्व्यापकत्वे का श्रुतिः प्रमाणम् ?
11) ब्रह्मणः अण्वादि परिमाणनिषेधात् किम् ?
12) अरूपमिति विशेषणं किं गमयति?
13) जाग्रदाद्यवस्थानां पौर्वापर्यक्रमः केन क्रमेण वर्तते ?
14) किं नाम व्यापकत्वम् (परिच्छेददृष्ट्या) ?
15) जगत्तुच्छमेतत् समस्तं तदन्यत् इत्यत्र तच्छब्देन कः परामृष्टः ?
16) न निरोधो न चोत्पत्तिरित्याद्यां कारिकां लिखत?
17) न चाऽकेवलत्वमिति पदस्य कः अर्थः?
18) आत्मनः प्रतिबिम्बत्वे प्रमाणभूतां श्रुतिं लिखत?

**B) निम्नलिखितेषु यथारुचि पञ्च समाधेयाः।** **5x5=25**

1) सिद्धान्तबिन्दोः पीठिकादिशा आत्मतत्वप्रतिपादनस्य वैय्यर्थ्यं प्रतिपाद्य निराकृत्य च तत् त्वं पदयोः लक्ष्यार्थं वाच्यार्थं च वर्णयित्वा, महावाक्ये लक्षणायाः उपादानं

कथमिति वर्णयत।

2) जीवस्वरूपविषयकानां चार्वाकादीनां मतानां स्वरूपं प्रदर्शयत।

3) न वर्णा न वर्णाश्रमाचारधर्माः,न माता पिता वा इत्यादि श्लोकस्य च सिद्धांतबिन्दुदिशा व्याख्यानं कुरुत।

4) न सांख्यं न शैवमित्यादि श्लोकव्याख्यानदिशा सांख्यमीमांसकयोः मतं निराकुरुत।

5) न चोर्ध्वं न चाधो इति श्लोकं श्रुतियुक्तिभ्यां व्याख्यात।

6) अरूपं तथा ज्योतिराकारकत्वात् इति विरोधाभासं यथाग्रन्थं सप्रसंगं निरस्यत।

7) न च त्वं न चाहं न चायं प्रपंचः इति पंक्तिं यथाग्रन्थं सप्रसंगं व्याख्यात।

**C) अधस्ताद् अनुप्रियमेकम् अनुबध्नीत। 10x1=10**

1) प्रथमश्लोकस्य सिद्धान्तबिन्दुटीकायाः संग्रहेण स्वरूपं वर्णयत।

2) दशश्लोक्याः अष्टमनवमश्लोकयोः सिद्धान्तबिन्दुदिशा अर्थं वर्णयत।

***

RKMVERI/DSP/MAIS/17-22/D2021/SK-171

# SK-171 अद्वैतसिद्धिः

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

**A) एकेन पदेन वाक्येन वा उत्तरत।** **1x15=15**

1) मङ्गलश्लोके विष्णु इति पदस्य कोऽर्थः ?
2) श्रीरामविश्वेश्वरमाधवानामित्यादि श्लोके कः अलङ्कारः ?
3) आत्मम्भरितां भावयितुमित्यस्य कोऽर्थः भवति ?
4) अद्वैतसिद्धिग्रन्थः केषां मोदाय ?
5) अद्वैतं नाम किम् ?
6) पक्षतालक्षणं किम् ?
7) निश्चितौ हि वादं कुरुत इति कस्योक्तिः ?
8) प्रथममिथ्यात्वलक्षणं किम् ?
9) अद्वैतसिद्धिावुक्तं मिथ्यात्वानुमानं किम् ?
10) कथायास्त्रैविध्यं विलिख्य तिसृणामपि लक्षणानि लिखत ?
11) द्वितीयतृतीयमिथ्यात्वलक्षणे केन उक्ते स्तः ?
12) तृतीयमिथ्यात्वलक्षणं किम् ?
13) व्यावहारिकत्वं नाम किम् ?
14) प्रातिभासिकत्वं नाम किम् ?
15) किं नाम पारमार्थिकत्वम् ?
16) किं नाम सत्त्वम् ?
17) असत्त्वं नाम किम्
18) अद्वैतसिद्धिपदे सिद्धिशब्दस्य कः अर्थः ?

**B) निम्नलिखितेषु यथारुचि पञ्च समाधेयाः।** **5x5=25**

1) मायाकल्पितेत्यादि श्लोकं यथापाठं व्याख्यात।
2) विप्रतिपत्तिविषयकं न्यायामृतकारपक्षमुपस्थाप्य खण्डयत।

3) प्रथममिथ्यात्वलक्षणे पूर्वपक्षं यथाग्रन्थमालोचयत।

4) द्वितीयमिथ्यात्वलक्षणे पूर्वपक्षमारचयत।

5) निषेधस्य व्यावहारिकत्वं द्वितीयमिथ्यात्वलक्षणदिशा साधयत।

6) पंचममिथ्यात्वलक्षणं विचारयत।

7) चतुर्थमिथ्यात्वलक्षणं विचारयत।

**C) एकं प्रश्नं समाधत्त** **10x1=10**

1) तृतीयमिथ्यात्वलक्षणं यथाग्रन्थं निरूपयत।

2) पंचममिथ्यात्वलक्षणं व्याख्याय मिथ्यात्व– मिथ्यात्वविचारमुपस्थापयत।

***

RKMVERI/DSP/MAIS/19-24/D2021/SK-201

# SK-201 सिद्धान्तकौमुदी पञ्चसन्ध्यन्ता

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत। 1x10=10**

1) लघुसंज्ञाविधायकं सूत्रं किम्?
2) सिद्धान्तकौमुदीकर्ता कः?
3) के स्पर्शाः?
4) एदैतोः मिथः सावर्ण्यं भवति नवा?
5) यकारस्य आभ्यन्तरप्रयत्नः कः?
6) गुणसंज्ञाविधायकं सूत्रं किम्?
7) उपसर्गसंज्ञाविधायकं सूत्रं किम्?
8) प्रत्याहारेषु इतां ग्रहणं भवति नवा?
9) माहेश्वराणि इत्यस्यार्थः कः?
10) संहितासंज्ञाविधायकं सूत्रं किम्?
11) अवसानसंज्ञाविधायकं सूत्रं किम्?
12) कण्ठोष्ठं कस्य उच्चारणस्थानम्?

**B) अधोलिखितेषु यथारुचि पञ्च समाधत्त। 3x5=15**

1) शिवो वन्द्यः इति प्रयोगं ससूत्रं साधयत।
2) हरी एतौ इति प्रयोगं ससूत्रं प्रतिपादयत।
3) तच्छिवः इति प्रयोगं सूत्रनिर्देशपुरस्सरं वर्णयत।
4) मध्वरिः इति प्रयोगं सूत्रनिर्देशपुरस्सरं वर्णयत।।
5) मनोरथः इति प्रयोगं ससूत्रं निष्पादयत।
6) रामश्चिनोति इति प्रयोगं ससूत्रं वर्णयत।
7) प्रेजते इति प्रयोगं साधयत।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) आद् गुणः इति सूत्रस्य सोदाहरणं व्याख्यां लिखत।
2) आदिरन्त्येन सहेता इति सूत्रं व्याख्यात।
3) मुखनासिकावचनोऽनुनासिकः इति सूत्रस्य व्याख्या कार्या।
4) तस्मिन्निति निर्दिष्टे पूर्वस्य इति सूत्रस्य व्याख्यां विलिखन्तु।
5) ऊकालोऽज्झ्रस्वदीर्घप्लुतः इति सूत्रस्य व्याख्या कार्या।

**D) निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रं सोदाहरणं व्याख्यात।
2) इको गुणवृद्धी इति सूत्रं सोदाहरणं यथाशास्त्रं व्याकुरुत।

***

RKMVERI/DSP/MAIS/19-24/D2021/SK-205

# SK-205 सिद्धान्तकौमुदी(शब्दाधिकारः)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**E) दशानां प्रश्नानाम् उत्तरं देयम्। 1x10=10**

1) समासग्रहणं नियमार्थम्। कः नियमः ?
2) ङ्यप्प्रातिपदिकात् इति सूत्रे ङ्याब्ग्रहणं किमर्थम् ?
3) रामाणामित्यत्र नामि कुतः प्रवर्तते ?
4) अतो गुणे इत्यनेन किं विधीयते ?
5) सन्निपातपरिभाषायाः अनित्यत्वस्य ज्ञापकः कः ?
6) सर्वादिगणे तुल्यपर्यायस्य समशब्दस्य ग्रहणं कुतः न ?
7) भसंज्ञा केन सूत्रेण ?
8) घिसंज्ञा केन सूत्रेण ?
9) एकाल्प्रत्ययस्य का संज्ञा ?
10) औङ् इति कस्य संज्ञा ?
11) पीलुने इत्यत्र कुतः न पुंवद्भावः ?
12) शसो न इति कस्यापवादः ?

**F) सप्तसु पञ्चानां प्रश्नानां समाधानं कुरुत। (रूपसाधनम्) 3x5=15**

1) रामाणाम्
2) अयम्।
3) त्वया
4) सखा
5) यूष्णः
6) हरेः
7) रमया

**G) पञ्चसु त्रीन् प्रश्नान् समाधत्त। 5x3=15**

1) यस्मात्प्रत्ययविधिः तदादिप्रत्ययेऽङ्गम्। विवृणुत।
2) कृत्तद्धितसमासाश्च। विशदयत।
3) हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। विशदयत।
4) एरनेकाचोऽसंयोगपूर्वस्य। वर्णयत।
5) अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्। वर्णयत।

**H) द्वयोरेकं समाधत्त। 10x1=10**

1. जरायाः जरसन्यतरस्याम्। व्याख्यात।
2. पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु। विवृणुत।

***

# SK-209 सिद्धान्तकौमुद्यां कारकप्रकरणम्।

कालः – होराद्वयम् पूर्णाङ्कः - 50

---

**A) यथेच्छं दशानामुत्तरं लिखत। 10x1=10**

1) प्रातिपदिकार्थसूत्रे संख्यामात्रस्य उदाहरणं लिखत।
2) अधिशीङ्स्थासां कर्म इत्यस्मात् कर्म इत्यनुवृत्तौ पुनः कर्तुरीप्सिततमं कर्म इत्यत्र कर्मग्रहणं किमर्थम् ?
3) अभिधानं केन प्रायेण भवति ?
4) दुह्याच्...इति कारिकां लिखत।
5) शत्रून् अगमयत् स्वर्गमिति कारिकां लिखत।
6) दृशेश्च इत्यनेन किं ज्ञाप्यते ?
7) स्वतन्त्रः कर्ता सूत्रस्य अर्थं लिखत।
8) येनाङ्गविकारः सूत्रस्योदाहरणं लिखत।
9) करणत्वं नाम किम् ?
10) वारणार्थानामीप्सितः सूत्रार्थं लिखत।
11) विभाषा गुणेऽस्त्रीयाम् इत्यस्य योगविभागस्य फलं किम् ?
12) आधारस्त्रिधा के ?

**B) यथेच्छं पञ्च समादधातु। 5x3=15**

1) किन्नाम प्रातिपदिकार्थः ? विवेचयत।
2) उभसर्वतसोः कार्या – कारिकां प्रपूर्य सोदाहरणमर्थं स्पष्टयत।
3) भीत्रार्थानां भयहेतुः- इति सूत्रं सोदाहरणं व्याख्यायताम्।
4) कारकप्रकरणे दूरान्तिकार्थानां शब्दानां योगे काः विभक्तयः उक्ताः? सोदाहरणं लिखत।
5) यतश्च निर्धारणमिति सूत्रं व्याख्यायताम्।
6) चर्मणि द्वीपिनं हन्ति...इति कारिकां प्रपूर्य लिखत।

7) ल्यब्लोपे कर्मण्यधिकरणे च इति वार्तिकं स्पष्टयत।

**C) यथेच्छं त्रयः समादधातु।** **3x5=15**

1) तथायुक्तं चानीप्सितमिति सुत्रं व्याख्यात।

2) अकथितं च इति सूत्रं व्याख्यायताम्।

3) अपादानसंज्ञासूत्रं सोदाहरणं स्पष्टयत।

4) आधारोऽधिकरणमिति सूत्रं व्याख्यायताम्।

5) गतिबुद्धिप्रत्यवसनार्थशब्दक..इति सूत्रं सोदाहरणं विवेच्यताम्।

**D) यथेच्छम् एकं समाधेयम्।** **1x10=10**

1) सम्प्रदानकारकं निरूपयत।

2) कर्मप्रवचनीयसंज्ञाविधायकानि सूत्राणि व्याख्यात।

***

RKMVERI/DSP/MAIS/18-23/D2021/SK-215

# SK-215 एकशेषाात् समासाश्रयं यावत्, स्त्रीप्रत्ययः च

समयावधिः - घण्टाद्वयम् | पूर्णाङ्काः - 50

---

**A) यथेच्छं दश प्रश्नान् उत्तरयत** **1x10=10**

1) स्त्रियाम् इत्यधिकारस्य व्याप्तिः का?
2) शूद्रा इत्यस्य कोऽर्थः?
3) भवती इत्यत्र स्त्रीप्रत्ययः कः?
4) द्विपदी, द्विपदा इत्यनयोः को भेदः?
5) गङ्गाशब्दात् कप्रत्यये कानि रूपाणि?
6) इत्वरी इत्यत्र केन सूत्रेण कः प्रत्ययो विधीयते?
7) स्त्री पुंवच्च इत्यस्यार्थं लिखत।
8) विग्रहः कतिविधः?
9) मातृष्वसा अत्र षकारः कथम्?
10) विशिष्टलिङ्गो नदीदेशोऽग्रामाः इत्यत्र अग्रामाः इति किम्?
11) भीरुष्ठानम् इत्यत्र सकारस्य षत्वं कथम्?
12) शरावती इत्यत्र दीर्घः केन सूत्रेण?

**B) यथेच्छं पञ्च समाधत्त** **3x5=15**

1) वोतो गुणवचनात् इति सूत्रस्य अर्थोदाहरणे लिखत।
2) क्रीतात् करणपूर्वात् इति सूत्रस्य अर्थोदाहरणे लिखत।
3) ऊरूत्तरपदादौपम्ये इति सूत्रस्य अर्थोदाहरणे लिखत।
4) वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रस्य अर्थोदाहरणे लिखत।
5) ऋक्पूरब्धूःपथामनक्षे इति सूत्रस्य अर्थोदाहरणे लिखत।
6) द्व्यन्तरुपसर्गेभ्योऽप ईत् इति सूत्रस्य अर्थोदाहरणे लिखत।
7) वैयाकरणाख्यायां चतुर्थ्या इति सूत्रस्य अर्थोदाहरणे लिखत।

**C) यथेच्छं त्रीणि समाधत्त** **5x3=15**

1) प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः इति सूत्रं व्याख्यात।
2) पुंयोगादाख्यायाम् इति सूत्रं व्याख्यात।
3) ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री इति सूत्रं व्याख्यात।
4) सुपां सुपा इत्यादिकारिकां व्याख्यात।
5) तत्पुरुषे कृति बहुलम् इति सूत्रं व्याख्यात।

**D) एकस्य प्रश्नस्य उत्तरं प्रयच्छत** **10x1=10**

1) अजाद्यतष्टाप् इति सूत्रस्य तत्सूत्रगतवार्तिकानां च अर्थोदाहरणे लिखत।
2) स्वाङ्गलक्षणं लिखत।

***

# SK-227 सिद्धान्तकौमुद्यां कृत्यप्रकरणात्पूर्वकृदन्तं यावत्।

समयः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेच्छं दश प्रश्नाः समाधेयाः। 1x10=10**

1) अर्यपदस्य कोऽर्थः?
2) वृत्तिकृता केलिमरः प्रयोगः कस्मिन्नर्थे इष्ट?
3) आशीः का?
4) उपसर्या गौः इत्यस्य आशयः कः?
5) कथं गृहा दाराः?
6) अम्बाम्ब ____ इति सूत्रं पूरयत।
7) वयसि च इति सूत्रं किमर्थम्?
8) आदायचरः इत्यस्य कोऽर्थः?
9) पुष्पाहरः कः?
10) आखूत्थः इत्यत्र कस्मिन्नर्थे प्रत्ययः?
11) अपे क्लेशतमसोः इति सूत्रस्यार्थं लिखत।
12) अनिरोधः इति पदस्य कः अर्थः?

**B) यथाकामं पञ्च प्रश्नान् उत्तरत। 3x5=15**

1) णेर्विभाषा इत्यत्र विहितविशेषणं किमर्थम्?
2) शैङोऽवस्यतेश्च पृथग्ग्रहणं सूत्रे किमर्थम्?
3) नर्तकः इति रूपं साधय।
4) वह्यं करणम् इति सूत्रं व्याख्यात।
5) कप्रकरणे मूलविभूजादिभ्य उपसंख्यानम् इति वार्तिकं व्याख्यात।
6) धया कन्या इत्यादौ कथन्न ङीप्?
7) स्तम्बेरमः इति रूपं साधयत।

**C) त्रीन् समाधत्त।** **5x3=15**

1) "गिरिशमुपचचार प्रत्यहं सा सुकेशी"

"प्रेक्ष्य स्थितां सहचरीम्"

उभयत्र कथं समाधानम्?

2) उपसर्या काल्या प्रजने इति सूत्रं व्याख्यात।

3) कथं भार्या वधूरिति यथाग्रन्थं प्रतिपादयत।

4) हरतेरनुद्यमनेऽच् इतीदं सूत्रं व्याख्यात।

5) यशस्करी इति रूपं साधयत।

**D) एकमुत्तरत।** **10x1=10**

1) कृत्यप्रत्ययान् विवृणुत।

2) कर्मण्यण् इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/MAIS/21-26/D2021/SK-236

## SK-236 लघुसिद्धान्तकौमुदी अजन्तपुंलिङ्गान्ता

कालावधिः-होराद्वयम् | पूर्णाङ्काः - 50

---

**A) यथाकामं त्रयोदशसु दश समाधेयाः।** **1x10=10**

1) ह्रस्वस्य अवर्णस्य प्रयोगे कः प्रयत्नः?

2) ऊष्मवर्णाः के?

3) इण्प्रत्याहारः केन णकारेण भवति?

4) अणुदित्सूत्रे अप्रत्ययपदस्य कः अर्थः?

5) के तालव्यवर्णाः?

6) 'ते प्राग्धातोः' इत्यत्र ते इत्यनेन केषां परामर्शः?

7) अन्तःस्थवर्णाः के?

8) 'मुखनासिकावचनः' इत्यस्य समासनिर्देशं कुरुत।

9) 'पूर्वत्रासिद्धम् इति सूत्रेण किमसिद्धं भवति?

10) 'स्वादिष्वसर्वनामस्थाने' इति सूत्रेण किं भवति?

11) प्रातिपदिकसंज्ञाविधायकं सूत्रद्वयं लिखत।

12) 'हे राम' इत्यत्र सम्बुद्धिलोपः केन सूत्रेण भवति?

13) 'रायो हलि' इत्यत्र रायः इति किं प्रातिपदिकम्? का च विभक्तिः?

**B) यथेच्छं पञ्चानां सन्धिविच्छेदं कुरुत।** **1x5=5**

उपेन्द्रः, प्रेजते, मनीषा, षण्णाम्, एतन्मुरारिः, नरो हन्ति, देवायिह

**C) यथेष्टं पञ्चानां सन्धिं कुरुत।** **1x5=5**

समासे एव, भोः देवदत्तः, देवाः आगच्छन्ति, गो यूतिः, सूर्यः भाति, नराः हसन्ति

**D) यथेच्छं पञ्चानां संज्ञानां विधायकं सूत्रं लिखत।** **1x5=5**

घि, अङ्गम्, नदी, सर्वनामस्थानम्, संयोगः, उपधा, अनुनासिकः

**E) यथाकामं पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) रामान् इति रूपं ससूत्रं साधयत।
2) हरये इति रूपं ससूत्रं साधयत।
3) सर्वे इति रूपं ससूत्रं साधयत।
4) सखा इति रूपं ससूत्रं साधयत।
5) तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रं व्याख्यात।

**F) यथेच्छं द्वयोः एकं समाधत्त।** **10x1=10**

1) 'तुल्यास्यप्रयत्नं सवर्णम्' इति सूत्रं व्याख्यात।
2) 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/MAIS/20-25/D2021/SK-239

# SK-239 लघुसिद्धान्तकौमुद्यां कृत्तद्धितौ

समयः - होराद्वयम् | पूर्णाङ्कः - 50

---

**A) दशप्रश्नाः समाधेयाः।** **1x10=10**

1) स्त्रोत्रम् इत्यत्र कः कृत्प्रत्ययः।
2) पच्धातोः क्तप्रत्यये किं रूपं सिध्यति।
3) किं नाम उपसमाधानम्।
4) तयोरेव कृत्यक्तखलर्थाः इति सूत्रे तयोः इति पदेन कयोः ग्रहणम्।
5) भुज्धातोः अभक्ष्यार्थे किं रूपं भवति।
6) केन सूत्रेण तद्राजसंज्ञा विधीयते।
7) शुक्रियम् इत्यत्र कः तद्धितप्रत्ययः।
8) ठस्य कादेशः केन सूत्रेण विधीयते।
9) शिखावलः इत्यत्र कः तद्धितप्रत्ययः।
10) केशवः इत्यत्र कः मत्वर्थीयः प्रत्ययः वर्तते।
11) मेधावान् इत्यत्र कथन्न लच्प्रत्ययः।
12) वाग्ग्मी इत्यत्र कः मत्वर्थीयः प्रत्ययः।

**B) यथाशक्यं त्रयम् उत्तरत** **3x5 = 15**

1) पण्डितम्मन्यः इति रूपं साधयत।
2) ण्वुल्तृचौ इति सूत्रं सोदाहरणं व्याख्यात।
3) संक्षेपेण टीका लेख्या – सत्
4) नन्दिग्रहिपचादिभ्यः ल्युणिन्यचः इति सूत्रं व्याख्यात।
5) वृद्धसंज्ञाविधायकं सूत्रद्वयं सोदाहरणं व्याख्यात।
6) तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रं सोदाहरणं व्याख्यात।
7) गुरोश्च हलः इति सूत्रम् आलोचयत।

**C) यथेष्टं त्रयं समाधत्त।** **5x3 = 15**

1) तुमुन्प्रत्ययविधायकानां सूत्राणां विचारः कार्यः।
2) चातुरार्थिकाः के, तान् ससूत्रं विशदयत।
3) गोत्रसंज्ञां युवसंज्ञाञ्चाश्रित्य टीका लेख्या।
4) समर्थानां प्रथमाद्वा इति सूत्रं आलोचयत।
5) मतुपः मकारस्य वकारविधायकं शास्त्रं सोदाहरणम् आलोचयत।

**D) एकमुत्तरत।** **10x1=10**

1) निष्ठावयवस्य तकारस्य नकारविधायकानि सूत्राणि विचारयत।
2) वासरूपोऽस्त्रियाम् इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/MAIS/18-23/D2021/SK-241

**SK-241 महाभाष्यम्-2-4**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) दशानां प्रश्नानाम् उत्तरं देयम्। 1x10=10**

1) विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इत्यत्र ज्ञापकं किम् ?
2) लृकारोपदेशः किमर्थः ?
3) वर्णैकदेशाः वर्णग्रहणेन गृह्यन्ते चेत् के दोषाः ?
4) प्रत्याहारेष्वनुबन्धानां ग्रहणं कुतो न।
5) अयोगवाहाः के।
6) अक्षरसमाम्नायोपदेशः किमर्थः ?
7) वृद्धिरादेच् इत्यत्र कुत्वं कस्मान्न भवति।
8) कयोर्विशेष्यविशेषणभावः।
9) तच्छेषः इति कस्य सूत्रस्य शेषः।
10) पुगन्तलघूपधस्येत्यत्र कथं विग्रहः करणीयः।
11) धातुलोपः इत्यत्र कथं विग्रहः करणीयः।
12) मुखग्रहणाभावे उभयवचनानां ग्रहणं केन न्यायेन।

**B) सप्तसु पञ्चानां प्रश्नानां समाधानं कुरुत। 3x5=15**

1) विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते। कथम्।
2) नियमादिको गुणवृद्धी भवतः विप्रतिषेधेन।
3) रूपसामान्याद्वा।
4) अणोऽप्रगृह्यस्य इति सूत्रे पूर्वेण णकारेण प्रत्याहारः इति कथं ज्ञायते।
5) वृद्धिरादैच् इत्यत्र कुत्वं कुतो न।
6) वर्णानुपलब्धौ चानर्थगतेः।
7) ऊकालोजिति वा योगः इत्येतच्छ्लोकवार्तिकं व्याख्यात।

**C) पञ्चसु त्रीन् प्रश्नान् समाधत्त।** **5x3=15**

1) वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते चेत् के के दोषाः सम्भवन्ति।
2) वर्णानाम् अर्थवत्त्वं यथाभाष्यं प्रतिपादयत।
3) इको गुणवृद्धी इत्यत्र तच्छेषपक्षः।
4) अकारस्य विवृतोपदेशः किमर्थः।
5) हयवरट् इत्यत्र हकारोपदेशस्य फलं निरूप्यताम्।

**D) द्वयोरेकं समाधत्त।** **10x1=10**

1) ऋलृक्सूत्रं भाष्यदिशा व्यख्यात।
2) तुल्यास्यप्रयत्नं सवर्णमित्यत्र आस्यशब्दार्थविचारं प्रतिपादयत।

***

## SK-242 महाभाष्ये ५,६,७,आह्निकानि

कालः – होराद्वयम्                                                    पूर्णाङ्कः - 50

---

**A) यथेच्छं दशप्रश्नानामुत्तरं लिखत ।                                    1x10=10**

1) ईदूदेद्द्विवचनं प्रगृह्यम् इति सूत्रस्य तपराणां प्रगृह्यसंज्ञा किमर्थमुच्यते ?
2) ईदूतौ च सप्तम्यर्थे अत्र अर्थग्रहणेन किं ज्ञायते ?
3) अदसो मात् इति सूत्रस्य योगविभागः किमर्थः ?
4) अमुया इत्यत्र प्रगृह्यसंज्ञायां को दोषः ? कथं समाधानम् ?
5) बभ्रुशे इत्यत्र केन सूत्रेण प्रगृह्यसंज्ञा प्राप्ता ? कथं वारिता ?
6) निपात एकाजनाङ् सूत्रे एकग्रहणेन किं ज्ञापयति ?
7) ओत् सूत्रस्य प्रयोजनद्वयं किम् ?
8) दाधा घ्वदाप् इत्यत्र पित्प्रतिषेधाद्वा इति वार्तिकस्य कोऽर्थः ?
9) अद्यन्तयोः भाष्यकारमते अर्थं लिखत।
10) भाष्यमते प्रियाष्टौ, प्रियाष्टानौ अनयोः कतरद्रूपं साधु ?
11) विभाषा दिक्समासे बहुव्रीहौ इत्यस्मिन् समासग्रहणं किमर्थम् ?
12) इग्यणः सम्प्रसारणम् इत्यत्र वर्णसंज्ञापक्षे कः दोषः ? किं समाधानम् ?

**B) यथेच्छं पञ्च प्रश्नान् समादधातु।                                    3x5=15**

1) घुसंज्ञायां प्रकृतिग्रहणं किमर्थम् इति वार्तिकं सप्रसङ्गं निरूपयत।
2) आद्यन्तवदित्यत्र अन्तवत्वे कानि प्रयोजनानि।
3) निष्ठासूत्रं संक्षेपेण वर्णयत।
4) इदूतौ सप्तम्यत्येव....तत्रापि सरसी यदि इति कारिकां विलिख्य व्याख्यात।
5) ईदूदेद्द्विवचनं प्रगृह्यम् अत्र चत्वारः पक्षाः के ?
6) उभस्य सर्वनामत्वे कोऽर्थः ? यथाभाष्यं लिखत।
7) वाक्यस्य संप्रसारणसंज्ञायां दोषमुद्भाव्य समधत्त ।

**C) यथेच्छं त्रयाणाम् उत्तरं प्रयच्छतु।** **5x3=15**

1) उञः ऊः इति सूत्रं यथाग्रन्थं व्याख्यात।
2) दीङः प्रतिषेधः स्थाघ्वोरित्वे वार्तिकं प्रतिपादयत।
3) ओत्सूत्रं विशदयत।
4) संज्ञोपसर्जनप्रतिषेधः इति यथाभाष्यं वर्णयत।
5) विभाषा दिक्समासे बहुव्रीहौ सूत्रं व्याख्यात।

**D) यथेच्छम् एकं समादधातु।** **10x1=10**

1) अदसो मादिति सूत्रं यथाभाष्यं व्याख्यात।
2) बहुगणवतुडतिसंख्या .... इति सूत्रं निरुपयत।

***

RKMVERI/DSP/MAIS/18-23/D2021/SK-255

# SK-255 परिभाषेन्दुशेखरे (१-५०)

समयावधिः - घण्टाद्वयम् पूर्णाङ्काः - ५०

---

**A) यथेच्छं दश प्रश्नान् उत्तरयत** **1x10=10**

1) परिभाषेन्दुशेखरग्रन्थस्य मङ्गलाचरणं किम्?
2) संज्ञाशास्त्रस्य कार्यकालपक्षे कथं वाक्यार्थबोधः?
3) अनेकविधम् आन्तर्यम् इत्यत्र अनेकविधं नाम कीदृशम्?
4) ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न इत्यत्र ज्ञापकं किम्?
5) अवतप्तेनकुलस्थितम् इति पदस्य कोऽर्थः?
6) संज्ञाविधौ प्रत्ययग्रहणे इति परिभाषा कुत्र स्पष्टा?
7) निजौ चत्वार एकाचः के?
8) प्रकृतिवदनुकरणं भवति इति कथं ज्ञायते?
9) कार्यम् अनुभवन् इति सूत्रे हिः कुतः प्रयुक्तः?
10) अक्तपरिमाणं नाम किम्?
11) अनागमकानां सागमका आदेशाः इत्यस्य किं तात्पर्यम्?
12) परमगर्गेभ्यो हितम् इत्यत्र कथं न तदन्तविधिना यञ्?

**B) यथेच्छं पञ्चानां व्याख्यानं कुरुत** **3x5=15**

1) व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्
2) नानुबन्धकृतमसारूप्यम्
3) संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति
4) यस्मिन्विधिस्तदादावल्ग्रहणे
5) अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्
6) सर्वो द्वन्द्वो विभाषयैकवद् भवति

**C) यथेच्छं त्रयाणाम् व्याख्यानं कुरुत** **5x3=15**

1) उभयगतिरिह भवति
2) प्रत्ययग्रहणे चापञ्चम्याः
3) भाव्यमानेन सवर्णानां ग्रहणं न
4) वर्णाश्रये नास्ति प्रत्ययलक्षणम्
5) एकदेशविकृतमनन्यवत्

**D) एकस्य प्रश्नस्य उत्तरं प्रयच्छत** **10x1=10**

1) निर्दिश्यमानस्यादेशाः भवन्तीति परिभाषां प्रतिपादयत।
2) गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः इति परिभाषां प्रतिपादयत।

***

RKMVERI/DSP/MAIS/18-23/D2021/SK-265

# SK-265 लघुशब्देन्दुशेखरे न पदान्तयावद्भागः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दश प्रश्नान् उत्तरत। 1x10=10**

1) स्वौजसमौड् इत्यादीनां षड्विधसूत्रेषु क्वान्तर्भावः?
2) लघुशब्देन्दुशेखरस्य विग्रहं पक्षद्वयेऽपि लिखत।
3) हलन्त्यम् इत्यत्र उपदेशपदानुवृत्तिःकुतः ?
4) प्रकल्प्य इत्यस्य कैयटेन को अर्थःउक्तः?
5) तपरसूत्रं विभक्तितकारे न प्रवर्तते इत्यत्र किं प्रमाणम्?
6) आकारहकारयोः सावर्ण्ये हो ढ इति कस्योपलक्षणम्?
7) नाज्झलौ इत्यत्र आकारप्रश्लेशे किं लिङ्गम्?
8) ऊकारस्य अल्पप्राणत्वमुत महाप्राणत्वम्? कथम्?
9) एक एव यत्नः सर्वकार्यजनक इति क्व सूत्रभाष्ये उक्तम्?
10) आत्मा बुद्ध्या समेत्यर्थान्... इति कारिकां लिखत ।
11) कण्ठादीनां स्थानत्वव्यवहारः कथम्?
12) शिक्षायां कवर्गस्य उच्चारणस्थानं किमुक्तम्?

**B) यथाकामं पञ्च प्रश्नान् उत्तरत। 3x5=15**

1) उपजीव्यविरोधात् सन्धिर्न इति मतं दूषयत।
2) पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गा इत्यस्याशयं लिखत।
3) यद्वा सम्प्रसारणाश्रयस्य प्रतिषेध इत्यमूमंशं सप्रसंङ्गं व्याख्यात।
4) इको गुणवृद्धी सूत्रं निरूपयत।
5) मुखनासिकावचन इति सूत्रं व्याख्यात।
6) अ अ इति सूत्रं व्याख्यात।
7) ऐ औ च् सूत्रस्य वैयर्थ्यम् उपपादयत।

**C) यथाकामं त्रीन् प्रश्नान् उत्तरत।** **5x3=15**

1) ऊकाल इति सूत्रं व्याख्यात।
2) इको यण् अचि  इति सूत्रं व्याख्यात।।
3) तपरतत्कालस्य इति सूत्रं व्याख्यात।।
4) सवर्णसंज्ञायां यावदास्यभवतुल्यं ग्राह्यमिति यथाग्रन्थं निरूपयत।
5) नाज्झलौ इति सूत्रं व्याख्यात।

**D) यथाकाममेकमुत्तरत।** **10x1=10**

1) पूर्वत्रासिद्धमिति सूत्रं व्याख्यात।
2) अणुदित् सूत्रं यथाग्रन्थं निरूपयत।

***

RKMVERI/DSP/MAIS/17-22/D2021/SK-267

# SK-267 लघुशब्देन्दुशेखरे कारकप्रकरणम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत। 1x10=10**

1) रुचेरर्थः कः?
2) धातोः के पञ्चार्थाः?
3) आधारः कतिविधः?
4) दुहेरर्थः कः?
5) सर्वकर्मविहितद्वितीयादीनां कोऽर्थः?
6) स्थानिनः इत्यस्य अर्थः कः?
7) वारयतेरर्थः कः?
8) किं नाम स्वातन्त्र्यम्?
9) हेतुश्च कः?
10) घटात् एकः इति साधुः असाधुः वा?
11) अलं श्रमेण इत्यत्र केन सूत्रेण तृतीया?
12) बिभेतेरर्थः कः?

**B) अधोलिखितेषु यथारुचि पञ्च समाधत्त। 3x5=15**

1) उभयप्राप्तौ कर्मणि इति सूत्रस्य यथाग्रन्थं व्याख्यां लिखन्तु।
2) इत्थम्भूतलक्षणे इति सूत्रस्याशयं प्रकाशयन्तु।
3) कारके इति सूत्रस्य व्याख्या कार्या।
4) स्तोकं पाकः इत्यादौ कृद्योगषष्ठी, समासश्च कुतो नेति लिखत।
5) मन्यकर्मण्यनादरे इति सूत्रस्य यथाग्रन्थं व्याख्या विधेया।
6) येनाङ्गविकारः इति सूत्रस्य व्याख्या कार्या।
7) कैयटानुसारम् अपादानस्वरूपं प्रतिपादयन्तु।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) कर्तुरीप्सिततममिति सूत्रस्य तमबिति पदस्य प्रयोजनं प्रकाशयन्तु।
2) सहयुक्तेऽप्रधाने इति सूत्रस्य यथाग्रन्थं व्याख्यां प्रतिपादयन्तु।
3) तथायुक्तं चानीप्सितमिति सूत्रस्य व्याख्या कार्या।
4) आधारोऽधिकरणम् इत्यस्याशयं लिखत।
5) षष्ठी शेषे इति सूत्रं यथाग्रन्थं प्रकाशयत।

**D) निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) अकथितञ्च इति सूत्रस्य तात्पर्यं यथाशास्त्रं सविस्तरं प्रतिपादयन्तु।
2) कर्तृकर्मणोः कृति इति सूत्रस्य कृति इति पदस्य कृत्यं प्रतिपादयन्तु।

***

# SK-273 वैयाकरणभूषणसारे समासशक्तिप्रकरणात् स्फोटप्रकरणं यावत्

समयावधिः - घण्टाद्वयम् पूर्णाङ्काः - 50

---

**A) यथेच्छं दश प्रश्नान् उत्तरयत** **1x10=10**

1) सिद्धान्ते अव्ययीभावस्य लक्षणं किम्?
2) समासे संसर्गस्य वाच्यत्वे राजपुरुषपदेन कीदृशो बोधः?
3) असर्व इत्यत्र सर्वनामसंज्ञा कथम्?
4) बोधजनकत्वं शक्तिः इति कस्य मतम्?
5) बोधजनकतायाम् अनादित्वस्य किं लक्षणम्?
6) शक्तिग्राहकेषु मुख्यः कः?
7) निवृत्तम् इत्यत्र क्तप्रत्ययस्य कः अर्थः कौण्डभट्टस्य मतेन?
8) प्रादयो द्योतकाः चादयो वाचका इति कस्य मतम्?
9) नैयायिका असाधौ कथं बोधकत्वम् इच्छन्ति।
10) उद्धृतौदना इत्यत्र कः शाब्दबोधः?
11) अक्षैर्दीव्यति इत्यत्र कः शाब्दबोधः?
12) तुमुनादीनां भावे अर्थे किं मानम्?

**B) कारिकाणां लघु व्याख्यानम् उपस्थापयत** **3x5=15**

1) जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती...
2) अषष्ठ्यर्थबहुव्रीहौ...
3) असाधुरनुमानेन वाचकः...
4) सम्बन्धिशब्दे सम्बन्धो...
5) द्योतकाः प्रादयो येन...
6) अभेदैकत्वसङ्ख्याया...
7) विधेये भेदकं तन्त्रम्...

**C) यथेच्छं त्रयाणाम् उत्तराणि लिखत** **5x3=15**

1) षोढा समासान् सोदाहरणं व्याख्यात।

2) नञर्थान् सोदाहरणं व्याख्यात।

3) त्वादिप्रत्ययानाम् अर्थं विस्तारयत।

4) देवताप्रत्ययार्थान् विवृणुत।

**D) एकस्य प्रश्नस्य उत्तरं प्रयच्छत** **10x1=10**

1) समासशक्तिप्रकरणस्य सारं लिखत।

2) स्फोटं विवेचयत।

***

RKMVERI/DSP/MAIS/17-22/D2021/SK-281

**SK-281 वाक्यपदीयम्**

कालः – होराद्वयम् पूर्णाङ्कः - 50

---

**A) द्वादशप्रश्नेषु दशप्रश्नाः समाधेयाः-** **10x1=10**

1) अर्थभावेन कः विवर्तते ?
2) अत्रातीतविपर्यासः केवलामनुपश्यति। कुत्र ?
3) प्रयोजनस्य भेदद्वयं किम् ?
4) हरिमते मणिरूप्यादिविज्ञानं तद्विदां केन प्रमाणेन ?
5) तेजसः द्वे शक्ती के ?
6) जातिः संज्ञा इति पक्षे कथं व्यक्तिः प्रतिपद्यते ?
7) इन्द्रियस्यैव संस्कारः इत्यस्योदाहरणं किम् ?
8) कार्यपक्षे ध्वनिः कः ?
9) अणवः कथं शब्दः भवति ?
10) कः अपभ्रंशः ?
11) असाधवः कुतः साक्षादवाचकाः ?
12) केषां साधुरवाचकाः ?

**B) सप्तसु पञ्चानां सप्रसङ्गं व्याख्यां लिखत-** **5x3=15**

1) प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक्।।
2) आसन्नं ब्रह्मणः तस्य तपसामुत्तमं तपः।
प्रथमं च्छन्दसामङ्गमाहुर्व्याकरणं बुधाः।।
